candra SEkharaM - rAgaM mArga hindOLam - tALaM Adi

English

pallavi
candra SEkharaM sadA bhajE(a)haM
SAmbhavI manOharaM Sankaram

anupallavi
indrAdi dEva sannuta padaM
cintita phala-prada guru guha nutam

caraNam
ashTA-daSa vAdyAdi priyaM
ati Suddha maddaLa vAdya priyaM
sangIta SAstrAdi saMyutaM
sanmArga hindOLa rAga nutam
(madhyama kAla sAhityam)
ashTa siddhi dAyakaM mukundaM
ashTa pASa hara tIrtha vaibhavaM
Ananda kandaM sOmAskandaM
ajapA naTanAnanda vaibhavam

Devanagari

चन्द्र शेखरं - रागं मार्ग हिन्दोळम् - ताळं आदि

पल्लवि
चन्द्र शेखरं सदा भजेऽहं
शाम्भवी मनोहरं शङ्करम्

अनुपल्लवि
इन्द्रादि देव सन्नुत पदं
चिन्तित फल-प्रद गुरु गुह नुतम्

चरणम्
अष्टा-दश वाद्यादि प्रियं
अति शुद्ध मद्दळ वाद्य प्रियं
सङ्गीत शास्त्रादि संयुतं
सन्मार्ग हिन्दोळ राग नुतम्
(मध्यम काल साहित्यम्)
अष्ट सिद्धि दायकं मुकुन्दं
अष्ट पाश हर तीर्थ वैभवं
आनन्द कन्दं सोमास्कन्दं
अजपा नटनानन्द वैभवम्

Tamil

சந்த்3ர ஸே1க2ரம் - ராக3ம் மார்க3 ஹிந்தோ3ளம் - தாளம் ஆதி3

பல்லவி
சந்த்3ர ஸே1க2ரம் ஸதா3 ப4ஜேऽஹம்
ஸா1ம்ப4வீ மனோஹரம் ஸ1ங்கரம்

அனுபல்லவி
இந்த்3ராதி3 தே3வ ஸன்னுத பத3ம்
சிந்தித ப2ல-ப்ரத3 கு3ரு கு3ஹ நுதம்

சரணம்
அஷ்டா-த3ஸ1 வாத்3யாதி3 ப்ரியம்
அதி ஸு1த்3த4 மத்3த3ள வாத்3ய ப்ரியம்
ஸங்கீ3த ஸா1ஸ்த்ராதி3 ஸம்யுதம்
ஸன்மார்க3 ஹிந்தோ3ள ராக3 நுதம்
(மத்4யம கால ஸாஹித்யம்)
அஷ்ட ஸித்3தி4 தா3யகம் முகுந்த3ம்
அஷ்ட பாஸ1 ஹர தீர்த2 வைப4வம்
ஆனந்த3 கந்த3ம் ஸோமாஸ்கந்த3ம்
அஜபா நடனானந்த3 வைப4வம்

Telugu

చంద్ర శేఖరం - రాగం మార్గ హిందోళమ్ - తాళం ఆది

పల్లవి
చంద్ర శేఖరం సదా భజేఽహం
శాంభవీ మనోహరం శంకరమ్

అనుపల్లవి
ఇంద్రాది దేవ సన్నుత పదం
చింతిత ఫల-ప్రద గురు గుహ నుతమ్

చరణమ్
అష్టా-దశ వాద్యాది ప్రియం
అతి శుద్ధ మద్దళ వాద్య ప్రియం
సంగీత శాస్త్రాది సంయుతం
సన్మార్గ హిందోళ రాగ నుతమ్
(మధ్యమ కాల సాహిత్యమ్)
అష్ట సిద్ధి దాయకం ముకుందం
అష్ట పాశ హర తీర్థ వైభవం
ఆనంద కందం సోమాస్కందం
అజపా నటనానంద వైభవమ్

Kannada

ಚಂದ್ರ ಶೇಖರಂ - ರಾಗಂ ಮಾರ್ಗ ಹಿಂದೋಳಮ್ - ತಾಳಂ ಆದಿ

ಪಲ್ಲವಿ
ಚಂದ್ರ ಶೇಖರಂ ಸದಾ ಭಜೇಽಹಂ
ಶಾಂಭವೀ ಮನೋಹರಂ ಶಂಕರಮ್

ಅನುಪಲ್ಲವಿ
ಇಂದ್ರಾದಿ ದೇವ ಸನ್ನುತ ಪದಂ
ಚಿಂತಿತ ಫಲ-ಪ್ರದ ಗುರು ಗುಹ ನುತಮ್

ಚರಣಮ್
ಅಷ್ಟಾ-ದಶ ವಾದ್ಯಾದಿ ಪ್ರಿಯಂ
ಅತಿ ಶುದ್ಧ ಮದ್ದಳ ವಾದ್ಯ ಪ್ರಿಯಂ
ಸಂಗೀತ ಶಾಸ್ತ್ರಾದಿ ಸಂಯುತಂ
ಸನ್ಮಾರ್ಗ ಹಿಂದೋಳ ರಾಗ ನುತಮ್
(ಮಧ್ಯಮ ಕಾಲ ಸಾಹಿತ್ಯಮ್)
ಅಷ್ಟ ಸಿದ್ಧಿ ದಾಯಕಂ ಮುಕುಂದಂ
ಅಷ್ಟ ಪಾಶ ಹರ ತೀರ್ಥ ವೈಭವಂ
ಆನಂದ ಕಂದಂ ಸೋಮಾಸ್ಕಂದಂ
ಅಜಪಾ ನಟನಾನಂದ ವೈಭವಮ್

Malayalam

ചന്ദ്ര ശേഖരം - രാഗം മാര്ഗ ഹിന്ദോളമ് - താളം ആദി

പല്ലവി

ചന്ദ്ര ശേഖരം സദാ ഭജേऽഹം

ശാമ്ഭവീ മനോഹരം ശങ്കരമ്

അനുപല്ലവി

ഇന്ദ്രാദി ദേവ സന്നുത പദം

ചിന്തിത ഫല-പ്രദ ഗുരു ഗുഹ നുതമ്

ചരണമ്

അഷ്ടാ-ദശ വാദ്യാദി പ്രിയം

അതി ശുദ്ധ മദ്ദള വാദ്യ പ്രിയം

സങ്ഗീത ശാസ്ത്രാദി സംയുതം

സന്മാര്ഗ ഹിന്ദോള രാഗ നുതമ്

(മധ്യമ കാല സാഹിത്യമ്)

അഷ്ട സിദ്ധി ദായകം മുകുന്ദം

അഷ്ട പാശ ഹര തീര്ഥ വൈഭവം

ആനന്ദ കന്ദം സോമാസ്കന്ദം

അജപാ നടനാനന്ദ വൈഭവമ്

kshEtra - tiruvArUr